श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि सुप्रभातम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि सुप्रभातम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

देवकीपुण्यसञ्जात ! वासुदेव ! जगत्पते।
उत्तिष्ठ राजगोपाल ! यशोदानन्दवत्सल॥ 1 ॥

श्रीचापमासभवभक्तपदाब्जरेणु -
प्राबोधकीप्रभृतिसूक्तिलसन्निजास्याः।
अध्यापकाः विरचिताञ्जलयस्समेताः
श्रीचापपत्तनपते ! तव सुप्रभातम्॥ 2 ॥

प्रातः प्रसूनकुलतः किल सौरभाणि
वातः प्रकीर्य हरितां पुनरान्तरेषु।
शीतः प्रवाति मधुरो मृदुलस्त्वदर्थं
भ्रातः ! प्रलम्बमथितुः तव सुप्रभातम्॥ 3 ॥

नानाविधाभरणजालविभूषिताङ्ग्यः
मानातिलङ्घिविनयावनताः नताङ्ग्यः।
गानाभिभूतकलकण्ठगणाः उपेताः
हे नाथ ! कार्मुकपुरस्तव सुप्रभातम्॥ 4 ॥

क्षीराब्धिनाथ ! भगवन् ! मधुरावतार !
सूरात्मजातरण ! गोकुलकृत्तलील !।

धाराधराभ ! धरणीधरधारिपाणे !
श्रीराजगोप ! यदुनायक ! सुप्रभातम्॥ 5॥

अम्भोजपत्रविपुलामलदीर्घनेत्र !
सम्भोगतुष्ट ! रमणीयविदर्भजायाः।
अम्भोजसम्भवमुखैरभिवन्दिताङ्घ्रे !
अम्भोदकृष्ण ! यदुनायक ! सुप्रभातम्॥ 6॥

भानूदितातटलतासदनेऽतिपुण्ये
भानूदयावधि विधाय रसैर्विलासम्।
भाऽनूनरूपगुणवृत्तसुराधिकायाः
श्रीनूतनाद्यपशुपालक ! सुप्रभातम्॥ 7॥

भीमानुजाय कथितामृतगीत ! नाथ !
धीमान्ममान्तर इति प्रथयन्प्रभावम्।
सीमातिलङ्घिकरुणामयदिव्यमूर्ते !
सोमास्य ! कृष्ण ! भगवन् ! तव सुप्रभातम्॥ 8॥

श्रीपारिजातचरितं व समुद्वमन्त्या
श्रीपाकशासनदृशा समुदीक्षितस्य।
श्रीपाकरम्यगुणसत्यमहानुभाव !
श्रीपाद्यकृष्ण ! यदुनायक ! सुप्रभातम्॥ 9॥

कामाभितप्तपशुपालविलासिनीनां
कामाभिपूरणकृतार्थकृपाविलास !।
कामादिपालसहजात ! शिवाभितप्त -
कामावतार ! यदुनायक सुप्रभातम्॥ 10॥

नीलाम्बुदाभ ! निखिलागममौलिलोल !
नीलाम्बरावरज ! निस्तुल ! नीलजाक्ष !।
नीलाम्बराभरणसूरसुतामनोज्ञ -
नीलाम्बुनील ! यदुनायक ! सुप्रभातम्॥ **11** ॥

कालाम्बुदाभकमनीय ! गुणाम्बुराशे !
तालाङ्कसोदर ! तमःकुलचित्रभानो !।
बालाङ्कके तुरथसूत ! सुनन्दपत्न्याः
बालाङ्कभूषण ! यदूत्तम ! सुप्रभातम्॥ **12** ॥

मालाकृते करुणया रचितप्रसाद !
कालाधिभीम ! निजमातुलदैत्यनेतुः।
सालाभिरामभुजपातितवारणेन्द्र !
मालाल्यपाद ! यदुनायक ! सुप्रभातम्॥ **13** ॥

शूलायुधस्तववितीर्णतदीयजीव !
मूलास्यसर्वजगतः मुनिबृन्दवन्द्य !।
तूलायिताखिलरिपो ! तपनोदितायाः
कूलावनीरत ! यदूत्तम ! सुप्रभातम्॥ **14** ॥

वेलातिलङ्घिकरुणारसपूर्णचित्त !
मेलालितोऽसि शिरसेति नुतार्जुनेन।
चेलापहार ! पशुपालककन्यकानां
वेला दिनोदयवती ! तव सुप्रभातम्॥ **15** ॥

बालासु तासु पशुपालकुलोदितासु
मालासु भृङ्गसमभासुरसौरभासु।
लीलायुतासु ललिताङ्गमनोहरासु
लोलान्तरङ्ग ! यदुनन्दन ! सुप्रभातम्॥ **16** ॥

मीनावतार ! महनीयगुणोपपन्न !
दीनावनैकरत ! पालितवेदवृन्द !।
एणाङ्कनन्दनविलोचन ! कृष्णसाम्य !
लीलासुरेन्द्र ! तव यादव ! सुप्रभातम्॥ 17॥

बाणाहवे महति बाहुसहस्रभीतौ
एणाङ्कमौलिरचितार्थनया दयार्द्रः।
वीणाप्रवादनकृते त्वमदा हि बाहू
शोणाम्बुदाक्ष ! यदुनन्दन ! सुप्रभातम्॥ 18॥

दुग्धाब्धिजास्विव परासु सदङ्गनासु
मुग्धासु तासु पशुपालककन्यकासु।
दुग्धाब्धितल्प ! मधुरासु रसोल्बणासु
मुग्धाऽयि ! कृष्ण ! यदुनन्दन ! सुप्रभातम्॥ 19॥

भिक्षाधिपाय सुहृदे हि सुदामनाम्ने
कक्षान्तकृष्णपृथुकाय सदुत्तमाय।
यक्षाधिपत्वमददाः क्षणवीक्षणेन
अक्षाममान्यदय ! यादव ! सुप्रभातम्॥ 20॥

ऋक्षादिनाथतनयां विनयोपपन्नाम्
ऋक्षादिनाथवदनामवलोक्य हृष्ट !।
यक्षादिनाथनुत ! हे वसुदेवपत्न्याः
कुक्षावुदीत ! भगवन् ! तव सुप्रभातम्॥ 21॥

दोषा रतैरतिरसै रचिता गुणाढ्या
योषागणैरनुपमैरमितैरुदारैः।
दोषाकरानन ! गुणाकर ! मामकीनान्
दोषानपाकुरु यदूत्तम ! सुप्रभातम्॥ 22॥

भाषापतिर्विहितवत्सकुलापहारः
घोषावनौ विहितवत्सकुलस्वरूपात्।
पूषायितात्स भवतः किल लज्जितोऽस्तौत्
तोषाय नन्दकुलनन्दन ! सुप्रभातम्॥ 23॥

वीरार्जुनः परशुरामतया हतोऽभूद्
वृक्षार्जुनौ च भवता भवतोऽवितौ च।
धीरार्जुनस्तु समरे परिपालितात्मा
कृष्णार्जुनातियशसा तव सुप्रभातम्॥ 24॥

रामानुजात ! रमणीयगुणाम्बुराशे !
रामावतारारणरञ्जितराक्षसेन्द्र !।
रामानुजातविशदीकृतगीत ! गोप !
रामानुषङ्ग ! यदुपुङ्गव ! सुप्रभातम्॥ 25॥

सामादिरूप ! सनकादिभिरर्चिताङ्घ्रे !
सामाधुपायचतुरानन ! सर्वलोक !।
सा मा ममेति ममतावति चैद्यराजे
सामानताप्रद ! यदूत्तम ! सुप्रभातम्॥ 26॥

कामान्विहाय चलतां सुलभस्वरूप !
कामान्विधातुमपि सज्ज निजानतानाम्।
कामात्मजाततनुजातकृते निरुद्ध -
कामारिभक्तपुर ! यादव ! सुप्रभातम्॥ 27॥

आजानुलम्बिभुजमध्यनिवासतुष्ट -
माजातमङ्गलनिधे ! मधुरस्वभाव !।
वाजातिदानपरिपालितभक्तबृन्द !
साजामरेडित ! यदूत्तम ! सुप्रभातम्॥ 28॥

आशासु विश्रुतमनोहरभव्यमूर्ते
नाशाय जात धरणीतलभारभूम्नः।
ईशायि ! सर्वजगतां रमणीमणिश्री -
योषानिवास ! यदुनन्दन ! सुप्रभातम्॥ **29**॥

भागीरथीजननपावनपादपद्म !
योगीन्द्रमानसनिवास ! धनुष्पुरीश !।
वागीश्वरादिनुत ! गोकुललोलचित्त !
भोगीन्द्रतल्प ! यदुनन्दन ! सुप्रभातम्॥ **30**॥

इत्थं धनुष्पुरपतेरिह सुप्रभातं
तेनैव मानिधिमुखेन कृतं मनोज्ञम्।
यो मानवः प्रतिदिनं पठति प्रभाते
तं श्रीश्च गीश्च सुखमायुरुपैति कीर्तिः॥ **31**॥

॥ इति श्रीधनुष्पुरीश श्रीराजगोपालकृष्णस्वामि सुप्रभातं समाप्तम्॥